শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৬৯

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৬৯

*রাসক্রীডাৱর্ণনম্*

কেশপাশধৃতপিঞ্ছিকাৱিততিসঞ্চলন্মকরকুণ্ডলং
হারজালৱনমালিকাললিতমঙ্গরাগঘনসৌরভম্।
পীতচেলধৃতকাঞ্চিকাঞ্চিতমুদঞ্চদংশুমণিনূপুরং
রাসকেলিপরিভূষিতং তৱ হি রূপমীশ কলযামহে॥ ১ ॥

তাৱদেৱ কৃতমণ্ডনে কলিতকঞ্চুলীককুচমণ্ডলে
গণ্ডলোলমণিকুণ্ডলে যুৱতি মণ্ডলেথ পরিমণ্ডলে।
অন্তরা সকলসুন্দরীযুগলমিন্দিরারমণ সঞ্চরন
মঞ্জুলাং তদনু রাসকেলিমযি কঞ্জনাভ সমুপাদধাঃ॥ ২ ॥

ৱাসুদেৱ তৱ ভাসমানমিহ রাসকেলিরসসৌরভং
দূরতোপি খলু নারদাগদিতমাকলয্য কুতুকাকুলা।
ৱেষভূষণৱিলাসপেশলৱিলাসিনীশতসমাৱৃতা
নাকতো যুগপদাগতা ৱিযতি ৱেগতোথ সুরমণ্ডলী॥ ৩ ॥

ৱেণুনাদকৃততানদানকলগানরাগগতিযোজনা-
লোভনীযমৃদুপাদপাতকৃততালমেলনমনোহরম্।
পাণিসঙ্ক্বণিতকঙ্কণং চ মুহুরংসলম্বিতকরাম্বুজং
শ্রোণিবিম্বচলদম্বরং ভজত রাসকেলিরসডম্বরম্॥ ৪ ॥

শ্রদ্ধযা ৱিরচিতানুগানকৃততারতারমধুরস্বরে
নর্তনেথ ললিতাঙ্গহারলুলিতাঙ্গহারমণিভূষণে।
সম্মদেন কৃতপুষ্পৱর্ষমলমুন্মিষদ্দিৱিষদাং কুলং
চিন্মযে ত্বযি নিলীযমানমিৱ সম্মুমোহ সৱধূকুলম্॥ ৫ ॥

www.prapatti.com

স্বিন্নসন্নতনুৱল্লরী তদনু কাপি নাম পশুপাঙগনা
কান্তমংসমৱলম্বতে স্ম তৱ তান্তিভারমুকুলেক্ষণা।
কাচিদাচলিতকুন্তলা নৱপটীরসারঘনসৌরভং
ৱঞ্চনেন তৱ সঞ্চুচুম্ব ভুজমঞ্চিতোরুপুলকাঙকুরা॥ ৬॥

কাপি গণ্ডভুৱি সন্নিধায নিজগণ্ডমাকুলিতকুণ্ডলং
পুণ্যপূরনিধিরন্বৱাপ তৱ পূগচর্ৱিতরসামৃতম্।
ইন্দিরাৱিহৃতিমন্দিরং ভুৱনসুন্দরং হি নটনান্তরে
ত্বামৱাপ্য দধুরঙগনাঃ কিমু ন সম্মদোন্মদদশান্তরম্॥ ৭॥

গানমীশ ৱিরতং ক্রমেণ কিল ৱাদ্যমেলনমুপারতং
ব্রহ্মসম্মদরসাকুলাঃ সদসি কেৱলং ননৃতুরঙগনাঃ।
নাৱিদন্নপি চ নীৱিকাং কিমপি কুন্তলীমপি চ কঞ্চুলীং
জ্যোতিষামপি কদম্বকং দিৱি ৱিলম্বিতং কিমপরং ব্রুৱে॥ ৮॥

মোদসীম্নি ভুৱনং ৱিলাপ্য ৱিহৃতিং সমাপ্য চ ততো ৱিভো
কেলিসম্মৃদিতনির্মলাঙগনৱঘর্মলেশসুভগাত্মনাম্।
মন্মথাসহনচেতসাং পশুপযোষিতাং সুকৃতচোদিত-
স্তাৱদাকলিতমূর্তিরাদধিথ মারৱীরপরমোতসৱান্॥ ৯॥

কেলিভেদপরিলোলিতাভিরতিলালিতাভিরবলালিভিঃ
স্বৈরমীশ ননু সূরজাপযসি চারুনাম ৱিহৃতিং ৱ্যধাঃ।
কাননেপি চ ৱিসারিশীতলকিশোরমারুতমনোহরে
সূনসৌরভমযে ৱিলেসিথ ৱিলাসিনীশতৱিমোহনম্॥ ১০॥

কামিনীরিতি হি যামিনীষু খলু কামনীযকনিধে ভৱান
পূর্ণসম্মদরসার্ণৱং কমপি যোগিগম্যমনুভাৱযন্।
ব্রহ্মশঙকরমুখানপীহ পশুপাঙগনাসু বহুমানযন
ভক্তলোকগমনীযরূপ কমনীয কৃষ্ণ পরিপাহি মাম্॥ ১১॥

**********



www.prapatti.com